संस्कृतस्वाध्यायः प्रथमा दीक्षा : सम्भाषणम्

संमस्कृतकक्ष्या- i

एषः एतौ एते

सः तौ ते

त्वं युवां यूयम्

अहम् आवां वयम्

आचार्यः - एषः कः ?

शिष्यः - एषः कुम्भकारः ।

आचार्यः - एषः किं करोति ?

शिष्यः - सः घटं करोति ।

आचार्यः - सः कीदृशं घटं करोति ?

शिष्यः - सः स्थूलं घटं करोति ।

आचार्यः - सः कया घटं करोति ?

शिष्यः - सः मृत्तिकया घटं करोति ।

आचार्यः - एतौ कौ ?

शिष्यः - एतौ तन्तुवायौ ।

आचार्यः - एतौ किं कुरुतः ?

शिष्यः - एतौ वस्त्राणि वयतः ।

आचार्यः - तौ कीदृशानि वस्त्राणि वयतः ?

शिष्यः - तौ अमूल्यानि वस्त्राणि वयतः ।

आचार्यः - तव कानि वस्त्राणि प्रियाणि ?

शिष्यः - कार्पासीयानि वस्त्राणि मम प्रियाणि । मम मित्रस्य और्णं वस्त्रं प्रियम् ।

आचार्यः - एते के ?

शिष्यः - एते चित्रकाराः ।

आचार्यः - एते किं कुर्वन्ति ?

शिष्यः - एते सुन्दराणि चित्राणि लिखन्ति ।

आचार्यः - ते के ?

शिष्यः - ते हरिणाः ।

आचार्यः - ते किं कुर्वन्ति ?

शिष्यः - ते हरितानि तृणानि खादन्ति ।

आचार्यः - त्वं किं करोषि ?

शिष्यः - अहं साहित्यं पठामि ।

आचार्यः - युवां किं कुरुथ ?

शिष्यः - आवां गीतं गायावः ।

आचार्यः - यूयम् आद्य पठितान् शब्दान् स्मरत।

शिष्याः - तथैव श्रीमन् ।